श्रीगणेशाय नमः ॥ ० ॥ श्रीपार्वत्युवाच ॥ ० ॥ भगवन्
गुणगणाधार सर्वत्र करुनिधे । इदानीं श्रोतुमिच्छामि
समयाचारमुत्तमं ॥ १ ॥ यत्पुरा समयाचारं पूर्वाम्ना
य प्रकीर्तितं । पुनश्च श्रोतुमिच्छामि त्राडाम्नायेषु य
द्भवेत् ॥ २ ॥ किंनाम सा या नाथ तस्याश्रवणमुत्तमं
तस्य संकेतविज्ञानाद् दांक्षितं प्रकमश्रुतं ॥ ० ॥ पूर्वा
म्नाये दिव्या आम्नाया देवताया प्रवित्तिताः । एथक् पृ
थगुच्यते नाथ पुनश्चैहि महेश्वरः ॥ ० ॥ आम्नाया
दांक्षिता नाम देवतानां पृथक् पृथक् । जपमाला

सनातं च तेषां वदद्याम्निधे॥ ॥श्रीमहादेव उवाच॥

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्॥ समयाचारसंकेतं

तत्र परमदुर्लभं॥६॥ पूजनादिषु यः कालो देवतानां पृथक्

पृथक्॥ स कालसमयो नाम यं ज्ञात्वा मृतमश्नुते॥७॥ का

लेऽप्याचरणं देवि यस्य देवस्य यद्विधिं॥ तं नाम समयाचा ॥२॥

रं देवानामपि दुर्लभं॥८॥ संकीर्तनात् पुनर्देवि रहस्यानां र

हस्यकं॥ समयाचारसंकेतं नाम्नां तत्र प्रकीर्तितं॥९॥ अथ

वा समयाचारात् समयाचारमुच्यते॥ समयागोपनीयानां

सदा गोप्या प्रकीर्तिता॥१०॥ विधिना समया देवीयमुंडे

च सा धन्या ॥ तेन रामकृतां नित्यं भोगं दत्वा सदा शुवि ॥११॥
इत्येवं समया नाम्नी सिद्धगंधर्वसेविता ॥ अस्या विधान
कथनादिदं मंत्रं प्र॥ कीर्तितं ॥१२॥ इदानीं परस्वयादेविद्धि
नाम समया शुवि ॥ कथितं विधिना भद्रे तत्कृपेण वरान
ने ॥१३॥ ॐ अस्य श्रीवाग्वादिनिमंत्रस्य ॥ ब्रह्मा
ऋषिः ॥ देवि विजयागायत्री छंदः ॥ वाग्वादिनि देवता
ऐं श्रीं ऊं सौः शक्तिः क्लीं किलकं ॥ श्रीवाग्वादिनी देव
ताप्रीत्यर्थं जपे विनियोगः ॥ एतेन्यासं संकृत्वा ॥ सवि
दग्ध हीतः मंत्रपठनीयं ॥ ॐ ऐं वद वद क्लीं वाग्वादिनि दं

सोः स्वाहा ॥ इत्यनेन सप्तधाभिमंत्रितं जलं क्षेपयेत् ॥ अथवः ॥
ह्रैं जय २ विजय २ परब्रह्मस्वरूपिणी सर्वं वै नमे वशमा
नय आनय ठं ठं सः स्वाहा ॥ इत्यनेन वा उपित्वा ॥ मस्यत ॥
अथवा स्वगृहे नित्यं नैवेद्यं जलं क्षेपयेत् ॥ अथानंतरतो दे
विसमयास्तोत्रमुत्तमं ॥ येन स्तुतासि द्धमूर्ली अक्षितापूर्व
२ दोमवेत् ॥ २० ॥ संविद ब्रह्म संभूते ब्रह्मपुत्री सदा नघे ॥
भैरवानंददीप्यर्थं पवित्रं भव सर्वदा ॥ २१ ॥ नमामी यामिनी
नाथां लेखालंकृतकुंतलां ॥ भवानि भवसंतापनिर्वापणसु
धानिधिं ॥ २२ ॥ सिद्धमूर्ली क्रिये देवी हि नबोधप्रबोधिनी ॥
राजाप्रजावशंकारि कालकूटत्रिभक्षिनी ॥ २३ ॥ अज्ञानेघन
दिमायाज्ञानाग्निज्वालरूपिणी ॥ आनंदाद्याहुतिः प्रीतिः स

म्यक् ज्ञानं प्रयच्छ मे ॥२४॥ दंष्ट्राधिरूढपरीपूरितमोगमोक्षं सु
ऽक्रमेणमदनांजनकामिनिनां ॥ आराधयामि वटुरांकुपरा
जयंति विश्वेश्वरीं त्रिनयनां विजयेति देवीं ॥२५॥ आनंदा
नंदिनीनंदेसस्दावंदेपदद्वयं ॥ उल्लासकंदलिकंदेस्वछंदे बो
धरूपिणी ॥ कवयः कविताल्लहरीकुर्वंतलार्घ्यदर्शनं पुंसां ॥ अ
पहरदैतिरितं निल्लयंकिंदिंन्नकरोति: संविदुल्लासः ॥२६॥
संविदासवयामेघो संविद्वगरीयसी ॥ ऊसितामे वनाशाय
निर्गंधाबोधरूपिणी ॥२८॥ सुसंविच्छुरिको देवि विजयासं
विद्दंकुरा ॥ वेदाविनुक्कसीगंगातिजो वल्लिरशोश्वरी ॥२९॥ विम
र्शोद्वैतरत्नाच वीरलक्ष्मीर्महेश्वरी ॥ समयामाहिनी चेवसि
द्धमूलिकमेहोसधी: ॥३०॥ मातुकानिज्ञानरूपसिद्धविद्यासर

स्वंति ॥ यानि चैतानि नामानि सर्वयेत्सि धार्मिकः ॥ ३१ ॥ संप्रा
प्नोति परं विद्यां भुक्तिं मुक्तिं च वांछितां ॥ पांडित्यं च कवीत्वं च
मंत्रसिद्धिं च विंदति ॥ ३२ ॥ इति विजयास्तोत्रं संपूर्णं ॥ ॥ ६ ॥ घ
समयागोपयन्नित्यं शिष्येभ्यः अपि सुंदरि ॥ विना समयं देवे
शि सामर्थ्यं नैव जायते ॥ ३३ ॥ सामर्थ्य सहिता देवी सर्वकर्माणि
साधयेत् ॥ विना समयया पूजा न कुत्रापि शुभोदया ॥ ३४ ॥
ब्राह्मे मुहूर्ते चोत्थाय भक्षिता पापनाशिनी ॥ तथा सूर्योदये
जाते माध्यान्हे भक्षिता तथा ॥ ३५ ॥ तथापरण्हे विधिवत् स
र्वपापविनाशिनी ॥ अर्धरात्रौ विशेषेण वांछितार्थफलप्रदा ॥ ३६ ॥
विना समयया देवि पूजां पूजादिकं चरेत् ॥ न च सिद्धिमवाप्नोति
अभिचाराय कल्प्यते ॥ ३७ ॥ अपमृत्युहरा नित्यं रोगशोकविना

विनाशिनी॥ दुष्टशत्रुप्रशमनि सर्वलोकानुरंजनी॥३८॥ सिद्धि
योह्यणिमाद्याश्च तस्य हस्तव्यवस्थिता॥ कायिकं वाचिकं वापि मा
नसं चैव दुष्कृतं॥३९॥ एतत्सर्वं क्षयं यांति ब्रह्महत्यादिकं तथा॥ समे
याऽपेक्षितायन समयाराधिता तथा॥४०॥ समयोपासितायेन
हिता: सर्वपातकैः॥ स शिवः स च योगी च सततपस्वी सदि तथा॥४१॥
स एव मुक्तिमार्गस्थः समयायेन नेक्षिता॥ जप्यपि त्वा च समे
यां यं यं मंत्रं जपेन्नरः॥४२॥ समस्तफलमाप्नोति सत्यं सत्यं वरा
नने॥४३॥ विना समयया या देवी मंत्रं जपति नित्यशः॥ कल्पायुत
भवेत्तस्या देवता कोपयत्यध्रुवं॥४४॥ इत्यादिनामकला जपि नित्यंक
र्मनलोपयत्॥ प्रमादाल्लोपयत्यस्तु नरकं लभते ध्रुवं॥४५॥ द
व्य चतुर्दशप्रोक्तं शृणु देवि प्रयत्नतः॥ तेषां मध्ये तु इदं वोदेन

ग्याह्येतु कदाचन॥४५॥ क्षीरं दधि च तक्रं च घृतं क्षौद्रं गुडं तथा॥
शर्करा शीतलं तोयं मेरमप्यारनालकं॥४६॥ आप्फुदं समयाचे
व धत्तूरं च विशं तथा॥ धत्तूरं चाविषं देवि द्रव्यं प्राणप्रहारकं॥४७॥
अन्यानि यानि द्रव्याणि आनंदार्थं पिबेन्नरः॥ आनंदे परमं ब्र
८ ह्म परं शक्तिः सदाशिवः॥४८॥ द्रव्यस्तु ध्यादिसंकल्पं आनंदा
र्थं च प्रकल्पयेत॥ आनंदे जायमाने पि भक्षयेन्न कदाचन॥४९॥
अतिपानाद्भवेत्सद्यो जपपूजादिनिःफला॥ बुद्धिनाशाद्भवेद्देवि त
तो मात्रां भिमां चरेत॥५०॥ समा मात्रा सर्वतो देवि ऊर्ध्वानंदं प्रवर्तते॥
अतिमात्राद्भवेद्दुःखं लोके निंदा प्रवर्तते॥५१॥ इत्येवं समयाचारः
कथितश्च वरानने॥५२॥ गुरोः सकाशात् यन्मंत्रं निस्संजपति यो
नरः॥५३॥ तेनैव मनुना मंत्री राउंगन्या समाचरेत॥५४॥ इत्था

संकल्प्यापुनर्भस्मिदुद्ध्यादीनभिमंत्रयेत्॥ भस्मनाभिमंत्रितं कृ
त्वापुनःसर्वमिवेधवं॥५३॥ गुरुं शिवं तया देविं निवेद्यैवं च न
क्षयेत्॥ एवकः शिवरूपोहमात्मानं च विभावयेत्॥५४॥ जीवः
शिवः शिवोजिवस्सजीवःकेवकः शिवः॥ पाशबद्धः सदाजिव
पाशमुक्तः सदाशिव॥५५॥ सदाशिवमयोभूत्वा द्व्यादीनाचरे
च्चदि॥ सविकल्पीषादिरहितः साक्षाद्ब्रह्ममयोभवेत्॥५६॥
सदाशिवमयोभूत्वा पंचमुद्रादिकं चरेत्॥ सर्वं ब्रह्ममयं प
श्यन्न स च दोषैर्न लिप्यते॥५७॥ मोहाद्वा कामलौल्याद्वा यः
कश्चित्तदिह वर्तते॥ साधकः साधकानां च नारकी भवति ध्रु
वं॥५८॥ समयो नाम यैः कालोपमयायः पूर्वसूचितः॥ तमि
दानीं प्रवक्ष्यामि उपायं शृणु सुन्दरि॥५९॥ प्रातर्मध्यान्हयोः

काळः प्रदोषश्च तृतीयकः ॥ रात्रेः प्रथमयामश्च चतुर्थः परिकीर्ति-
तः ॥ ६ ॥ पंचमस्त्वर्धरात्रे स्यात् पंचकाळाः प्रकीर्तिताः ॥ दिनस्य
प्रहरस्यादौ काळः प्रथम ईरितः ॥ ७ ॥ दिनस्य मध्यमः काळो द्वि-
तीयः परिकीर्तितः ॥ सूर्योदयस्तोरुर्ध्वं प्रदोषः स्तृतीयकः ॥ ८ ॥
५ आह्ने मुहूर्तमवधीमर्धरात्रादनंतरं ॥ यः काळः शाष्टमोङ्गेयो
देवानामपि दुर्लभः ॥ ९ ॥ शांतिकर्म तथा चैव स्तंभनं द्वेषणं त-
थोच्चाटनं मारणं च षट्कर्माणि शृणु प्रिये ॥ १० ॥ शांतौ प्रथ-
प्रथमः काळो माध्याह्ने द्वेषणं तथा ॥ तृतीयः स्तंभने प्रोक्तः
श्चतुर्थो वैश्यकर्मणि ॥ ११ ॥ उच्चाटने पंचमश्च षष्ठो मारणक-
र्मणि ॥ मारणे भद्रकं विद्यादासनं षट् प्रकीर्तितं ॥ १२ ॥ तोयं य-
त् शांतिके प्रोक्तमग्निर्वैश्ये प्रकीर्तितः ॥ पृथिवी स्तंभने

द्वेषा आकाशे देषणेन या॥६८॥ वायुरुच्चाटने प्रोक्तः पु
नरग्निर्मारणे तथा॥ यस्य मूलं तु हृदयं देवि तत्तं क्रमं उ क
संयुतं॥६९॥ तन्तत्क्रमंविधानार्थं कथितं निश्चि मात्मना॥
शीतांशुबिंदुं प्रथमे सलिलस्यां द्वितीयकं॥७०॥ क्षो
णिबीजं तृतीये च व्योमबीजं चतुर्थकं पंचमे वायुबिंदुं
च अग्निबीजं तु मारणे॥७१॥ इत्येवं समयाकालो मे देव्य
ैव प्रकाशितः॥ अथ दानीं प्रवक्ष्यामी आम्नायं क्रमम
नं पथक्॥७२॥ पूर्वाम्नायस्तदा ज्ञातो यदा प्राचीदिशि
स्थितः॥ मुखम् ऊर्ध्वं तं देवि यस्माकं त्वयि संनिधौ॥७३॥
सऊर्ध्वाम्नायः कथितो देवानामपि दुर्लभः॥ अघोर

संवर्तं देवी मत्स्यो कोगिरिजे प्रिये ॥७४॥ ऊर्ध्वाम्नाय ई त्युक्तः सर्व्वं
सर्व्वं वरानने ॥ षडाम्नायाः मया कथिता श्रोमतिः क्रमनामतः ॥७५॥
वशिनी जगन्नाथे विनु रिते न फल प्रदाः ॥ महिषासुरसंहर्त्री
तु महालक्ष्मीश्च दक्षिणे ॥७६॥ यस्मिन देवा प्रवर्त्तन्ते सा
धकानां सुखाय च ॥ श्रीविद्याभेदसहिता बालाचत्रिपुराय
च ॥७७॥ भुवनेशी अन्नपूर्णा पूर्वाम्नाय प्रकीर्तिता ॥ महा
सरस्वति विद्या तथा वाग्वादिनी तया ॥७८॥ प्रसंगिराजवी
निच पश्चिमाम्नाय देवता ॥८०॥ कालिका भेदसहिता ताराभे
दैश्च संयुता ॥ मातंगिभेरविछिन्ना तथा धूमावति तथा ॥८१॥
उत्तराम्नाय कथिता शीघ्र कार्यफलप्रदा ॥ समस्तभेदस
हिताः कालिकायाः प्रकीर्तिता ॥८२॥ द्वाविंशत्यक्षरानामद

६

क्षिणाम्नायसंज्ञकः ॥ परप्रासादमंत्रश्च ऊर्ध्वाम्नायः प्रकीर्तितः ॥ ८३ ॥
नारेशाक्यादयो विद्याश्चाम्नाये प्रकीर्तिताः ॥ ऊर्ध्वाम्नायोदयश्च
व दृष्टके मोक्षदो न भवेत् ॥ ८४ ॥ धर्मार्थकाममोक्षार्थाश्चाम्नायाश्च
प्रकीर्तिताः ॥ तयोक्तविधिनाश्रुत्वा कृत्वा फलमवाप्नुयात् ॥ ८५ ॥ पू
र्वाम्नायादिसर्वेषां विधानं शृणु सुंदरि ॥ कृत्वायनाश्रुलभेत फलं त
दुत्तमोत्तमं ॥ ८६ ॥ षट्कर्मफलदात्णां सर्वाम्नायाः प्रकीर्तिताः ॥ उ
त्तराम्नाय देवेशि तेषामाशु फलप्रदाः ॥ ८७ ॥ स्नातः शुक्लांबरो वीरः
शुद्धवेषधरस्तथा ॥ देवपूजारतो नित्यं तथा विद्युपरो दिवा ॥ ८८ ॥
नक्तं इत्यादिसर्वेषां यः कामेन चोत्तमं ॥ दिव्यं चतुष्कं पतेशाक्या
सहस्रं वपफलं भवेत् ॥ ८९ ॥ पूर्वाम्नायादिसर्वेषां माकोश्च पूर्ववदाम्ना
हे ॥ अन्त्यायेनाश्रुलभेत फलं देवेशि दुर्लभं ॥ ९० ॥ लक्षमालाप्रथ

७ मतोमातृकावर्णरूपिणी॥ अर्थधर्मकामश्चापि मोक्षफलप्रदायिनी॥११॥
माणिक्यरचितमाला साम्राज्यफलदायिनी॥ पुत्रजीवकया माला
लक्ष्मीविद्याप्रदायिनी॥१२॥ पद्माक्षमालारचिता यशोलक्ष्मी
प्रजायते॥ स्वर्णरौप्यमयी माला स्फाटिकी सर्वकामदा॥१४॥ रक्तचं
दनजा माला वश्यकर्मप्रदा मता॥ रुद्राक्षमालानिर्मिता सर्व
कामफलप्रदा॥१५॥ सर्वमालाप्रपूज्या च चंदनादिप्रलेपिता॥
समाश्रीयजपेद्विद्यां यथोक्तफलमश्नुते॥१६॥ एता माला प्र
सुभगाः पंचाम्नायेषु पूजिता॥ उत्तराम्नाये या माला कांगसीजेत
वदाम्यहं॥१७॥ अथ वर्णमयी माला सर्वोत्कृष्टा मता च या॥
मातृकाक्षरमयी चाथ वांछितार्थफलप्रदा॥१८॥ स्फाटिकैः रचि
ता चाथ रुद्राक्षफलसंभवा॥ स्वर्णादिरत्नपर्यंतरचिताफलदा

मता॥९९॥रुद्रजामाक्रांतथाकार्यावांछितार्थफलप्रदा॥रुद्रव
रफलस्यैवसूक्ष्मस्यचरताचया॥१००॥इत्यादिमाकादेवीशि
कुर्वीत्तविधिवन्नरः॥अथेदानींप्रवक्ष्यामियंत्रस्यविधिमुत्त
मं॥१॥स्वर्णेषट्वर्षपर्यंतंतांब्रेद्वादशमेवच॥रौप्येचत्रिंशद्व
र्षंचमहाशंखेसहस्रकं॥२॥स्वर्णेवस्फाटिकेचैववर्षसंख्यान
विद्यते॥सहसाकार्यसिध्यर्थंस्थापयेत्स्फाटिकोपरि॥३॥
यथोक्तविधिनालिख्ययथोक्तंपूजनंसदा॥वांछितंलभतेमं
त्रीनान्यथाजायतेफलं॥४॥आसनानिप्रवक्ष्यामित्वमुद्देवि
वदाम्यहं॥मेषासनंतुदेवेशार्थेआकर्षेव्याघ्रचर्मच॥५॥शां
तौमृगाजिनंशाक्तंमोक्षेवाव्याघ्रचर्मणि॥गोचर्मस्तंभनेदेवि
स्तंभनंचगजाजिनं॥६॥चर्मोष्ट्रस्यतुउच्चाटे वेदेषोस्यानच

मेच॥मारयोमाहिषेविंद्यांकर्मोद्धिएंतुवाचरेत॥८॥सर्वकर्म
प्रदंदेविवस्त्रपटासनंतथा॥ऊर्णासनंबृहत्काय्यंसर्वकर्मसुपू
जितं॥ दुःखदारिद्रहरणंविद्यात्काष्ठासनंप्रिये॥स्वर्णादि
रत्नजंदेविमहासौभाग्यवर्धनं॥९॥श्रृणुदेविविशेषेणचोत्त
राम्नायमासनं॥येनाक्रम्यतेपुण्यफलंदेवैर्दुर्लभं॥१०॥
शवासनंवैतुरंगगोमत्तमुंडासनंतथा॥श्मशानमासनंवापि
नगस्कन्धासनंतथा॥११॥सादर्शासनकंवापिमैथुनासनकंतथा॥ह
स्तमैथुनकंवापिवांछितार्थफलप्रदा॥१२॥जपस्थाननिदेवेशिसिद्ध
तीर्थानियानिच॥सचपीठेसिद्धक्षेत्रेगिरौदेवालयस्तथा॥१३॥
वटवृक्षेबिल्ववृक्षेरम्यायांविपिनेतथा॥नद्यादितीरेवाकुर्या
द्गुहापर्वतमस्तके॥१४॥श्रृणुदेविविशेषेणउत्तराम्नायहेतवे॥ [illegible]

वेश्यागृहे श्मशाने वा गत्वा मैथुनमाचरेत् ॥१५॥ ततोऽपादिकं
देवि कृत्वाभ्युपलक्ष्य तत्फलं ॥ अथवा सर्वहे रात्रौ लोकैर्मान्यः स
माचरेत् ॥१६॥ संप्राप्नोति फलं सर्वं चिंताभयविवर्जितः ॥ अथ
लानि प्रवक्ष्यामि स्वगपूजां [illegible] तिच ॥१७॥ तदा तु स्वगमध्ये तु चि
तयेद्ब्रह्मरूपिणीं ॥ शिवो [illegible] स्मरेद्देहे स्वात्मानं च विशेषाव
यत् ॥१८॥ शक्तिसानन्दमयी [illegible] ध्यात्वा तदा वै मैथुनं चरेत् ॥ तथा कु
कृते देवि प्राप्यते परमं पदं ॥१९॥ यानि कल्पितमंत्राणि कथितानि
वरानने ॥ ज्ञातव्यानि द्विधा देवि सर्वतंत्रेषु निश्चितं ॥२०॥ मंत्रविकृ
चित्र कथ्यंते कार्मि [illegible] द्विधा प्रकीर्तिताः ॥ पुंस्त्रीस्त्वे नाम मंत्राः विद्या
स्त्रिनामतास्तु मताः ॥२१॥ नपुंसका भवंत्यन्ये मंत्रा [illegible] सर्वसमीरि
ताः ॥ पुंसां सा हं फडंतास्युर्विहांतस्युस्त्रियो मताः ॥२२॥ नपुंसका

नमो नमस्तु त्रिविद्या जातिभिः पुनः ॥ अथ यन्त्रं च विदर्भं संपुटो रोधनं
तथा ॥ २३ ॥ योगः पल्लवइत्यते कथिताः षड् शुभे मे स्तु ॥ नाम वर्णा
अन्तरिक्षनामं मन्त्रा वर्णान्तरितं तथा ॥ २४ ॥ कुर्यान्निर्ग्रथनं नाम सर्वकर्माणि सस्यतेन ॥ मन्त्रार्णद्वय मध्यस्थ साध्य नामाक्षरं लिखेत् ॥ २५ ॥ विदर्भ एष विज्ञेयो वश्यकर्मणि सस्यते ॥ आदावन्ते च
मन्त्रस्यान्नाम्नो सौ संपुटः स्मृतः ॥ २६ ॥ प्रशस्तस्तम्भने देवि यथा
क्रियते यदि ॥ नाम्नाद्यन्त मध्येषु मन्त्रस्याद्रोधनं मतं ॥ २७ ॥ विद्वेषण विधानेषु प्रशस्तमिदमीरितं ॥ मन्त्रस्यान्ते भवेन्नाम योगः प्रो
क्तस्तेन मतः ॥ अनेन नाम्नो भवेन्मन्त्रः पल्लवो मारणा मतः ॥ २८ ॥ आ
गतः शावकश्च गन्धर्व गतः अगिर जं सुखं ॥ नेन आगमनं त्रस्यिांक
थितानि वरानने ॥ २९ ॥ यानि कानि च शास्त्राणि कथितान्यागम

स्यच ॥ तानि तानि प्रकथ्यंते लोकाचाणि सुंदरि ॥ २० ॥ आचारः प्र
थितो यस्तु मयाचक्र तवानघ नु वितस्याचारस्य नाम्नाच कुलाचार
: प्रकीर्त्तितः ॥ २१ ॥ आचारो द्विविधो देवि वाम दक्षिण भेदतः ॥ पंच
मुद्रादि संयुक्तो वामाचारः प्रकीर्त्तितः ॥ २२ ॥ पंचमुद्रा रहितो दक्षि
णाचारसंज्ञकाः ॥ नानातंत्राणि देवेशि यामलानि पृथक् पृथक् ॥ २३ ॥
डामराणि च सर्वाणि तंत्राणां हृदयानि च ॥ समासतः प्रवक्ष्यामि
शृणु देवि वदाम्यहं ॥ २४ ॥ चतुःषष्टिनि तंत्राणि यामलान्यष्ट सुं
दरि ॥ डामराणी च त्रीणि स्युः कथयामि प्रमाणतः ॥ २५ ॥ तंत्राणि
बहुधा देवि मया पूर्वं प्रकाशितं ॥ यामलान्यत्र वक्ष्यामि डामरा
णि तथा पुनः ॥ २६ ॥ विष्णु ब्रह्म शिवानां च यामलानि पृथ० पृथक् ॥
शक्तिर्गणाधिपतिश्चैकानि रूपः पृथक् पृथक् ॥ २७ ॥ सूर्यचंद्रमसो

मेव कथितानी वरानने। उड्डीशडामरं नाम तथा भूतडामरकं तथा। ३९।
त्राक्डिामरकं नाम डामरापि च पार्वति। कथं चापि प्रवक्ष्यामि त
न्त्राणि च मुखानने।४१॥ चतुःषष्टिश्च तन्त्राणि विख्यातं वामकेश्व
२० रे॥ तस्मात्प्रोक्तेषु तंत्रेषु कलाचार गुरुश्च दृष्टः॥४२॥ आगमाचार
निपुणः सर्वशास्त्रार्थतत्त्ववित्। सुवेशधारि दक्षश्च सह्य वक्ता गुरुः
वदः॥४३॥ एवं लक्षणसंयुक्त आगमस्य गुरुर्मतः। शिष्यस्या
यि गुणैर्युक्तो गुरुभक्तो अशकारतः सदा॥४४॥ धर्मकर्मादियुक्तश्च गुरुमं
त्रपरायणः॥ सत्यं बुद्धिर्गुरौ मंत्रे देवपूजनतत्परः॥४५॥ कुल
शास्त्रहिष्टमार्गेषु कृतबुद्धिरुदारधीः॥ एवं लक्षणासंयुक्तो शिष्य
स्यापि परस्पराः॥४६॥ मायानिद्रादिरहितः स्वालस्यादि विवर्जि
तः॥ सम्यारसंपन्नो धनाढ्यश्च क्रियापरः॥४७॥ ७ ॥

श्रीसदाशिवोवाच॥ ॥पूजाद्रव्यंप्रवक्ष्यामी पूजकाभिष्टसिद्धये॥ म
द्यालाभंतुविसंभ्य कपूर्के प्राप्नोतिपूजने॥४६॥ मद्यंमांसंतथामत्स्यंमु
द्रामैथुनमेवच॥ मकाराःपंचसुश्रोणेसोगकर्मसुहेतवे॥४७॥ यास्तुरास
र्वतंत्रेषुकथितानुविदुकोत्तमा॥ तस्यानामक्रवेदेवितीर्थंज्ञानमुक्तिदं॥ य॰४
॥४८॥ पशूनांचक्षयोग्यानांमांसंदेविविनिर्मितं॥ देविमंत्रेचविधिवत्त
स्याःकार्यशुद्धिरुत्तमा॥४९॥ मांसलक्षणंकथयेमत्स्याख्येववरानने॥ तर
हस्यमयाप्रोक्तामीतिःसिद्धिप्रदायकाः॥५०॥ गुडादिमध्येनिक्षिप्य
कुर्वीतिपुरीवधिनी॥ मुद्रातांविधिवंनाप्राकुःश्रणकादिकञ्जकोर्जितान् ॥५१॥
रोटिकापापिकाश्चैवमस्पषुकथिताःशुभाः॥ तस्यानामक्रवेदेविमु
द्रामुक्तिप्रदायिनी॥५२॥ जगाल्लिंगस्ययोगेनमैथुनंचक्रवेप्रिये॥
तस्यनामक्रवेदेविपंचमंपरीकीर्तिदं॥५३॥ प्रथमंतुक्रवेन्मद्यंमा
संचापिद्वितीयकं मत्स्यप्पापितृतीयंस्यानाममुद्राचतुर्थकं॥५४॥

२२

पंचमिंपंचमिंविद्यापंचैतानामनः स्मृताः ॥ पंचानांपंचनामानिमकारा
णिवरानने ॥ ५५ ॥ आद्यमस्यद्वितियस्यतृतीयस्यचतुर्थयोः ॥ पंचमस्य
तथादेवीमकारापंचदुर्लभा ॥ ५६ ॥ पंचमंदेविसर्वेषुममप्राणामवेप्रि
या ॥ पंचमेनविनादेविचंडीमंत्रंवृथाजपेत् ॥ ५७ ॥ यदीसर्वमकारेषु
ज्ञातीचकुरुतेप्रिये ॥ तस्यासिद्धिःकथंदेवीशोक्तिमंत्रंजपेत्कथं ॥ ५८ ॥ पं
चमेनविनादेविभुक्तिमुक्तिकथंभवेत् ॥ पंचमेनविनादेविकथंपंचफलं
१२९ दोभवेत् ॥ ५९ ॥ पंचमेनविनादेवियस्नानेदानेवधवं ॥ तन्नामममोक्षोपिदुष
मवृषानांचपातकं ॥ ६० ॥ आनंदंपरमंब्रह्ममकारापंनदसूचकं ॥ त
थाविशेषणोदेविपंचमंपरिकीर्तितं ॥ ६१ ॥ भगस्यस्मरणोपुण्यंभगस्य
दर्शनंतथा ॥ भगस्यपूजनंपुण्यंभगस्यपंचमेनतथा ॥ ६२ ॥ भगस्यपंच
मेदेवियत्सुखंममजायते ॥ नतत्सुखंजपेहोमेनदानेस्तपसातथा ॥ ६३ ॥
पंचमस्यकृतेदेवियत्पुण्यंतुविजायते ॥ नतत्पुण्यंसमंदेविसर्वती

यादिदर्शनं॥ ६४॥ जपहोमस्तथा दानं दीक्षायागादिकं तथा॥ कृतं पंचम
अन्नस्य कांतानार्हं निशोऽङ्घ्रि॥ ६५॥ त्रयोदशाब्दा द्वादशे पंचवर्षे षति
वार्षिकी॥ अप्रसूता विशेषेण पंचमाद्दीनं विप्रिये॥ ६६॥ अप्रसूता
वा विशेषेण प्रसूता वा प्रसूतिका॥ अवश्यं पंचमं कुर्यात्तस्याः क्रमात्क्रम
ह्येव हि॥ ६७॥ पंचमे चप्तमे च कृते देवि यत्कुर्यात्सु जनादि देवि॥ तद्दक्षयंत्र
के सुपुण्यं नात्र कार्य विचारणात्॥ ६८॥ गृहं चतो पघेतत्र तत्पनीतस्तु त
दिच॥ नानाभरणवस्त्राद्यैस्तथा द्रव्याणसुंदरी॥ ६९॥ पंचमापि चि
पाशाक्तिः स्वस्याः कुर्याच्चपंचमं॥ स्वस्यास्तोषं प्रकुर्याच्च विशेषेण
श्रृणु प्रिये॥ ७०॥ दर्पणान्तर्पणोऽप्येव वसनाद्विंगनादिभिः तनानार्थं
देवतानां च रहस्यं परमेश्वरणु॥ ७१॥ पनस्त्राने कृते देवि देवतास्तु प्र
सिद्धति॥ रात्रौ पंचमकाद्येषु कृत्वा पंचमपुत्रमं॥ ७२॥ भगमध्ये

१३

षुपद्रव्यं ग्रहणीयाच प्रयत्नतः॥ तस्य कुंडोद्भवं तोयं विज्ञेयं भुक्तिमुक्ति
दं॥ ७३॥ लक्ष्मनेभाग्ययोगेन देवतानां च दुर्लभं॥ तस्मिन्किंचिज्जपं सिद्ध
तांम्रपात्रे च धारयत्॥ ७४॥ तद्द्रव्यस्नानमात्रेण देवतासु प्रसीदति॥
स्त्रियो रजप्रपन्ने यस्मिन्वयसि जायते॥ ७५॥ ग्रहणीयाच्च ग्रसुज्ञ
गे ब्रह्मादीनां च दुर्लभं॥ स्वयंभूकुसुमं नाम देवतानां च प्रियं॥ ७६॥
यदि भाग्यवशाद्देवी लभ्यते कुसुमं त्विदं॥ न तस्य देवतानां च प्रकुर्या
नमुत्तमं॥ ७७॥ वार्षिकं तं लभेत्तेन त्रिससंसप्तयंवशानने॥ स्वगुरुदा॥ षं
मंत्रेण षडंगं न्यासमाचरेत्॥ ७८॥ श्रीं क्लीं हे हस्वदहे वा पंचम कारय
तत्॥ ततो ऊपादिकं कुर्यात् चाक्षयं लभते फलं॥ ७९॥ इदं रहस्यं क
थितं देवतास्वाहे तत्वे॥ षडाम्नायेषु मंत्रेषु रहस्यं हि समीरितं॥ ८०॥
ऊर्ध्वाम्नायमंत्रेषु प्रकुर्याच्च विशेषतः॥ ॐ वनितत्वंतरीनारीणां पंच

मं कारयन्प्रिये ॥१॥ तस्यान्नागस्य पद्मवं तच्च गोलोद्भवं मतं ॥ कुंड
गोलोद्भवं चैद्रवं अज्ञानेष्टणुसुंदरी ॥२॥ कथं स्नानं प्रकुर्याच्च देवता
तो पहेतवे ॥ पस्य कस्य तरो पुष्पं गृहीत्वा सुप्रयत्नतः ॥३॥ तेषाम
ध्य द्रुपं ग्राह्यं हस्ताग्नेमनसा तथा ॥ उत्तमा या पंचमं कुर्यात्तच्च कुर्वि
तो विधिपूर्वं नरः ॥४॥ रक्तचंदनपुष्पं च जले चैव विक्षिपेत्तदा ॥ तज्जले
न प्रकुर्वीत देवतास्नानमुत्तमं ॥५॥ वांछितफलमाप्नोति सत्यं
सत्यं वरानने ॥ वल्लीपुष्पाणि सर्वाणि नरो पुष्पाणि यानि च ॥६॥ ओ
षधीषु च सर्वासु यानि पुष्पाणि कानि चित् ॥ तानि सर्वाणि सुभगे
देवताभ्यो निवेदयेत् ॥७॥ सर्वाम्नाये पधीष्टानां तुलसि वर्जिनि
च ॥ अपराजितायाः पुष्पं च द्रूपपुष्पं च यत्नेन तु ॥८॥ करवीरस्य प
पुष्पं यत्पुष्पं बंधुजीवं ॥ कमलस्य च पत्पुष्पं पत्पुष्पं च पद्मस्य च ॥९॥

विसेषतस्ययोग्यानिसर्वपुष्पेषुसुंदरि॥पत्राणां॥बिल्वपत्राणी
पुजार्थेचसुमानने॥१०॥अथेदानिप्रवक्ष्यामिजपार्थंपिठमुत्तमं॥
हतपुर्णगीरियोग्यंत्रेताउडयानसंज्ञकं॥११॥जाळंधरेद्वापरेतुका
२५ मपिठंकलौयुगे॥चतुपिठानिस्तुगेशक्तिदेहेषुयानिच॥१२॥ता
नि चत्वारिवक्ष्यामिगुह्याद्गुह्यतराणिच॥शक्तेःसर्वशरिरंयत्पीठंपु
र्णगिरिमतं॥१३॥तस्याशिरस्यस्तुओडयाणंपरिकीर्तितं॥स्तने
जालंधरंप्रोक्तंकामपीठंभगंस्मृतं॥१४॥सर्वेषुकामपीठंयद्देवा
नामपिदुर्लभं॥एषुपिठेषुसंस्थित्वायंयंमंत्रंजपेत्प्रिये॥१५॥
ततस्यफलमाप्नोतिदेवतासुप्रसिदति॥सर्वातांबाकिदानंचदेव
तानांश्रृणुप्रिये॥१६॥यनकृत्वासुलभतेयथेष्ठंफलमुत्तमं॥जिन

त्यस्वमेोऽनेकाके मूलमंत्रेण साधका ॥१७॥ कारयेद्बलिदानं
च भोजनान्यथामं प्रिय ॥ ततश्चानंतरं देवि कुर्याच्चिस्तौतवाकन्नैव २
तत् ॥१८॥ बलिकिंसमुधरेयत्नादेकान्ते स्थापयेत्तदा ॥ स्थापयित्वा
बलिकन्त्रं वहरेच्च यथासुखं ॥१९॥ उत्तराम्नाय देवेशी मातंगीय
प्रकीर्तिता ॥ तस्याबलिंकी भोजनान्ते विनैवाचमनं कृतं ॥२०॥ मूल
मंत्रेणतु जेगबलिं दत्वा दिनेदिने ॥ कुर्यादुपादिकं कृत्वा ततमाच
नचरेत् ॥२१॥ पुनश्चरात्रौ सर्वेषां बलिं कृत्वा प्रयत्नतः ॥ यथाकुर्यादे
धिनाकुर्यान्न चयोक्तफलमश्नुते ॥२२॥ बलिश्चोद्दिविधा देवि सा
त्विको राजसस्तथा ॥ सात्विकाबलिरारख्याता मांसरक्तादिवर्जि
ता ॥२३॥ राजसा मांसरक्तादियुक्तः संप्रोच्यते प्रिये ॥ साधकास्त्रि

त्रिविधाज्ञेकाःसाधकाराजसस्तथा॥४॥तामसाश्च तथा देवी तेषां व
क्ष्यामि लक्षणं॥सात्त्विकाःसात्त्विकैर्युक्ता लक्षणेऽम्नापि सुंदरी॥५॥सा
त्त्विक्व भक्ति दानादि नित्यं कुर्यात्स्व यत्नतः॥राजसो राजसगुणो युक्तं
१५ नित्यम्भुक्तानने॥६॥राजसः सर्वभक्ति दानादि सुवेषै राजसैर्युतः॥ताम
सस्तामसगुणो रोषादि संयुतः प्रिये॥७॥नश्रधा भक्ति दानेषु पुष्प
नादिषु सुंदरी॥न स्तोत्रपठणे देवी नाममात्रेण साधकः॥८॥अथे
दानि प्रवक्ष्यामि मम मंत्राणि सुंदरी॥नान्यत्र मम मंत्राणि प्रसिद्धा
नि स्वभावतः॥९॥अघोरास्त्र्यं महामंत्रं आपदुद्धारणं तथा॥चिं
तामणि तथा देवि तपाम्त्स्तु उयंवरं॥१०॥चंडेश्वरं च सुजेग अ
र्धनारि नटेश्वरं॥नानातंत्रेषु देवेशी मम मंत्राणि यानि च॥११॥

ज्ञातव्यानि सदा भद्रे षडाम्नायाश्रुतानि च ॥ वामाचारेण वा देवी जप्त्वा फ
लमवाप्नुयात् ॥१२॥ दक्षिणाचारयोगेन जप्त्वा फलमवाप्नुयात् ॥ वि
शेषतश्च श्रुणु भद्रे मम मंत्राणि यानि च ॥१३॥ पूर्वाम्नायनिर्विघ्ननाशी
घ्र कालफलप्रदा ॥ नानापापहरा देवि मंत्रकामदुघाज्जिया ॥१४॥ यं
यं मंत्रमुपेद्देवि वीरस्तद्गतमानसः ॥ तं तं वा वे समाप्नोति फलं तत्तत्क्षणेन
रः ॥१५॥ नव मंत्राणि देवेशि मम मंत्राणि यानि च ॥ यानि यानि प्रसि
द्धानि तानि तानि च तानी च ॥१६॥ यथा स्वयं स्तुवा देवी वेदाश्चत्वारः प्र
र्तिताः ॥ ज्ञातव्या नादि संसिद्धाः पारंपर्योपदेशतः ॥१७॥ पारंपर्यत
याः श्रुतिजाम्नाये भद्रे ततः ॥ तथा त्वं पमयाप्रोक्ताः षडाम्नायाश्च स
र्धो ॥१८॥ स आम्नायः श्रुतिज्ञयः श्रुतस्तु वेदतोल्कनेन ॥ अतस्त्वया
अरिङ्गोपनियास्त्वयान्निवत् ॥१९॥ अथातः संप्रवक्ष्यामि रहस्यप

शृणु ॥ बहुमन्त्रिपदादेवि साधको देवयोगतः ॥२०॥ तत्र कस्य जपं कुर्यां व
मूलेन्यादिकं च ॥ सर्व देव नमस्कारं नित्यं कुर्यात्प्रयत्नतः ॥२१॥ सां
पादिकं तु तस्यैव यस्य संगमतेमनः ॥ संस्कारोज्झितमंत्रं तु जप्त्वा र्यर्थक्रो
२६ साधकः ॥२२॥ दुष्टाचारात्प्रमोदाद्वा अलस्याद्वापि सुंदरि ॥ संस्कारं यो ॥ म
गृहितस्य कृपनं यत्र कुत्रचित् ॥२३॥ हीनवीर्यमवाप्नोति मंत्रादिकं व
ननं ॥ इत्यादिदोषनाशार्थं विधानं शृणु सुंदरि ॥२४॥ प्रथमं जननं
नाम जीवनं तु द्वितीयकं ॥ तृतीयं ताडनं देवि चतुर्थं बोधनं मतं ॥
पंचमं त्वभिषेकं स्याद्विमलीकरणं षष्ठमं ॥ आप्यायनं सप्तमं तु
अष्टमं तर्पणं मतं ॥२६॥ नवमं दीपनं नाम गोपनं दशमं मतं ॥ मनूनां
मातृकामध्यादुद्धारो जननं मतं ॥२७॥ मंत्रवर्णांल्लिपिन्यस्य जपावोन्तरि
तत्क्रमात् ॥ एतज्जीवनकं नाम ताडनं शृणु चापरं ॥२८॥ मनुवर्णं समा

लिख्य ताडयेच्चंदनांभसा ॥ प्रत्येकं वायुना मंत्रि ताडनं नाम तत्स्मृतं ॥२९॥
मनुं लिख्य विधानेन पयामंत्रार्णसंख्यया ॥ अश्वत्थपल्लवैर्मंत्रैम
भिषिंचेद्विशुद्धये ॥३०॥ संचिंत्य मनसा मंत्रिं ज्योतिर्मंत्रेण निर्दहे ॥
मंत्रे मलत्रयं पद्दीवि विमलीकरणं त्विदं ॥३१॥ तारं व्योमाग्निमनुयुक् दंडी
ज्योतिर्मनुर्मतः ॥ कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः ॥३२॥ तेन मंत्रे
ण विधिवद्वौतं तदायतनमहतं ॥ मनुना वारिणा मंत्रं तर्पणं तर्पणं वत
तारमायारमायोगो मनोर्दीपनमुच्यते ॥ जप्यमानस्य मंत्रस्य गोप
नं त्वप्रकाशनं ॥३४॥ एतेन दश संस्काराः सर्वमंत्रेषु गोपिताः ॥ ए
कृता जपन्मंत्रं सदोषरहितः प्रिये ॥३५॥ निर्गुणं परमं ब्रह्म
कारादिविवर्जितं ॥ साकारं पद्मचेद्देवि बहुधा तर्पणादिषु ॥३६॥
तं तु तथा चात्र राज्ञां तं सर्वदेहिनां ॥ एकमेव परं ब्रह्म ज्योतिरूप
स्वरं ॥३७॥ साकारं यदि जायेत स्वेच्छया तु वरानने ॥ रूपं द्वयं तथा

तादेहिनां देहभेदतः ॥ ३८ ॥ भगाकारं च तत्रैव लिंगाकारं स्वरूप
वत् । चित्तु को जानाति लिंगाकारस्य रूपिणः ॥ ३९ ॥ भगाकारस्य संधा व
विदुषा ज्ञायते न सदा । स्त्रीजातिरूपा सर्वत्र सर्वदेहेषु या मताः ॥ सा
सा शक्तिरूपा विज्ञेया पुरुषः शिवरूपवान् ॥ तासां भगः स्त्रिकोणं तत्
कुंडं प्रोक्तं तु चोत्तमं ॥ ४१ ॥ पुरुषस्य लिंगं यद् देवि शिवो ज्ञेयः सनातनः ॥ म
१७ ततस्तेषां विशेषास्तु नरदेहे वरानने ॥ ४२ ॥ शक्तिशिवस्य विज्ञेयं
मसंवृतं तु उत्तमं ॥ भगकुंडं च स्रुग् भगो शिवलिंगं प्रकीर्तितं ॥ ४३ ॥ रज
स्तु अग्निस्तु भगो भगमध्ये षु स्रुपनं ॥ आज्यरूपमतं शुक्रं मनोह
ता प्रकीर्तितः ॥ ४४ ॥ फलं रूपं च तत्रैव नानासंस्कारकामना ॥ एवं वि
ज्ञायते यो मंत्रिमनो रूपं च मंत्रवित् ॥ ४५ ॥ नित्यहोममयितादेवि त २।
स्य पुण्यमनंतकं ॥ यं यं कामाधिकं देवि मनसा चिंत्यकारयेत् ॥ ४६ ॥
न दोष तत्र विज्ञेयस्तं तं काममवाप्नुयात् ॥ यथोक्तदेवताचाराद्यथोक्त

फलमश्नुते ॥४७॥ आयुर्लक्ष्मीयशोदं विकीर्तिर्मोक्षमवाप्नुयात् ॥ अ
स्मिंस्तंत्रे च सम्मया यामया परिकीर्तिता ॥४८॥ सा पूर्वं विज्ञया कल्पे चतु
र्धा संप्रकाशिता ॥ इमां विद्यां च तंत्रेऽस्मिन् रहस्यं च प्रकीर्तिता ॥४९॥ गो
राख्या प्रयत्नेन कृपनि यानकस्यचित् ॥ गोप्या गोप्या पुनर्गोप्या गोप्या
गोप्या पुनः पुनः ॥५०॥ पुनर्गोप्याः पुनर्गोप्याः जननीजारगर्भवत् ॥
अंतश्शाक्ताश्च सुजगबहिःशैवा वाश्चवैष्णवा ॥५१॥ एवं यः साधकाश्चैव
फलमाप्नोति न संशयः ॥ आचारो मम देवेशि तव चाटोपि च प्रिये ॥५
दिवसे गोपनं कृत्वा रात्रौ चैव समाचरेत् ॥ नानाशास्त्र साहस्रकोपेः
र्वे तिच साधकाः ॥५३॥ नोरीघ्रकाञ्चुलोनेगो फलमाप्नोति मानव
१७ आद्यस्तु पूर्वविर्गो न द्विधारः पुनः शृणु ॥५४॥ आर्द्राचारः सविज्ञ
मकारैः पंचभिर्युतः ॥ मकारैः पंचभिर्हीनस्तां पश्वाचारः प्रकीर्तितः ॥५
कृत्वैव विशेषतो राजन् आर्द्राचारः प्रकीर्तितः ॥ सर्वमन्त्रायसंभ्यतान् ॥

तंत्रेषु देवता॥५६॥विद्यामंत्रविभागेन देवेवाम्नाय उत्तः कृतौ॥विशेषा
द्देवि साकानां जितात्मनां॥५७॥रहस्यं शृणु देवेशि परमं गोपनं श्व
सर्वाम्नायाश्च कथितास्तव पार्श्वे पृथक् पृथक्॥५८॥सर्वेभ्यः श्रेष्ठ आ
म्नायः प्रपश्या संकीर्तितो मया॥गोप्याद्गोप्यतरो गुह्यो गुह्याद्गुह्यत
रो महान्॥५९॥उत्तराम्नायः सुभोगास्तदा गोप्यः प्रकीर्तितः॥यदि दाम्न
१८ त्वत्समालोकनी जवंति तन्निश्चला॥६०॥मत्समानः पुरुषा देवि साध
यदि हुतत्कौ॥ज्ञातिमायादिरहितस्तदा साधयितुं प्रिये॥६१॥याकू अमे
साधक्रो देवि अन्यथा हास्यतां व्रजेत्॥आगमाचारसुमेवेसर्वदागो
नःस्मृतः॥६२॥उत्तराम्नाय देवेशि विशेषाद्गोपनः कृतौ॥साधकास्तु
कृत्वौ देवि मायापिदाद्दिसंयुता॥६३॥अजितेंद्रियाः क्रोलुपाश्च पापा
कोचारवर्जिता॥अहंबुद्धितरानित्यं तस्माद्गोप्या विशेषता॥६४॥सु २
परीक्षिताय पुत्राय विनिताय प्रकाशयेत्॥सिद्धिहानिस्तु लभेनेतदा

तस्य प्रकाशनात् ॥ ६५ ॥ अतस्त्वं गोपयेद् देवि यदि त्वं मम वल्लभा ॥
उत्तराम्नाये या माला कथिता भुवि दुर्लभा ॥ ६६ ॥ तासामभावेसु सौ
भाग्यं वदस्व शुभ्रिये ॥ अक्षवर्णमयी माला अलाभे हस्तपर्व
महाशंखमयी माला अभावे स्फाटिकी मता ॥ स्फाटिक्याश्च अला
रुद्राक्षपूर्वनिर्मिता ॥ ६८ ॥ रुद्राक्षमालाभावे तु कमलाक्षफलैः
आसनान्युत्तराम्नाये कथितानि शुभानने ॥ ६९ ॥ सर्वाभावे
ग्र चर्ममयं वा कम्बलादिकं ॥ यत्र तोषितेष्वयि तानित्यवास
त्प्रिये ॥ ७० ॥ दीपस्य ज्योतिमध्ये तु मूलमंत्रेण पूजयेत् ॥ सर्व
र्वं पूज्यासु मूलेनैव प्रपूजनं ॥ ७१ ॥ विसर्जनं तु मूलेन मन
मर्चितपत्र ॥ सर्वद्रव्याद्यभावे तु आर्द्रकं परिकीर्तितं ॥ ७२ ॥
वानकं क्षीरं वा भक्ष्यपत्रं कर्ममाचरेत् ॥ मकारपंचकाभावे तु पंच

१९

तस्य व
त्रा॰स्तां
हृत्रिं
दाम
य॰
अव
गो
स्तु
या
स्तु

रयत्प्रिये॥७३॥अन्याचपंचमेदेवीमनसापंचमंचरेत्॥एवंतथा व
ततोदेविसमयाचारमुत्तमं॥७४॥साशिवाचप्रसन्नात्मद्यप्रा॥मो
ध्यप्रकाशनात्॥शिवोप्यतःप्रसन्नोभूत्स्वयंचपरमेश्वरः॥देवीं
तदाप्रसन्नमनसाउवाचगिरिजापतिं॥सर्वाण्यागमतंत्राणियानि
२० न्यपिसुंदरि॥७६॥तत्रापिन्यपिसर्वाणिविद्यामायादिकान्यपि॥आम
चतुर्युगेनुवर्त्तंतेपारंपर्योपदेशतः॥७७॥तेशांवेदयितापि॥ये
समर्थोस्तिमूतले॥कृपयातवदेवेशिकिंचितंकिंवर्णितुंशुभे॥गो
प्यतसर्वंतुनियतंसर्वस्वमिदंमेप्रिये॥राज्यंदेयंशिरोदेयं॥नतु
तंत्रमद्भुतं॥७९॥षडाम्नायेषुकथितंतंत्रंपरमदुर्लभं॥तथा
प्यंतसुभगेमातृज्ञारपदंतथा॥८०॥यदिचैदैवमारोहमया॥तु
प्रकाशितं॥अतस्त्वंगोपयेनित्यंयदित्वंममवल्लभा॥८१॥ ॥छ॥

इतिश्रीपार्वतिमहेश्वरसंवादेसमयाचारतंत्रंसंपूर्णमस्तु
॥ ॥श्रीसदाशिवार्पणमस्तु॥ ॥श्रीगुरुदेवत
पामस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥शाके १६
पार्थिवसंवत्सरेभाद्रपदशुद्ध ११ रवौतद्दिनेलेखनसंपू
२१ लेखकसरवंजनरदिवेकरउपनाम्नेदंपुस्तंआत्मकार्यार्थं
कारार्थंलिखितं॥ ॥तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिल
घनात्मुरर्वहस्तेनदातव्यंईदंवदतीपुस्तकं॥ ॥छ॥

तेश व
मा॰ मा
दिक्रं
तेदा न
उय
गो
स्तु
र्या
स्तु २।

ग्रंथानामसमयातंत्र

२१ 294.592 [illegible]

B 144 1380-MS.

समयचारतन्त्र